This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

ACC. NO: ~~534~~ M1153
Title: - आश्वलायन गृह्य सूत्र
Author - आश्वलायन
subject: Ritual
पत्रे: - २८

Checked 2012

K K S U LIBRARY
RAMTEK
441 106
M-1153
Dist Nagpur

①



३८

गृह्यसूत्र ३रा अध्याय

श्रीगणेशाय नमः॥ ॐ उक्तानि वैतानिका गृह्याणि वक्ष्यामस्त्रयः पाकयज्ञा
हुता अग्नौ हूयमाना अनग्नौ प्रहुता ब्राह्मणभोजने ब्रह्मणि हुता अथाप्यु
उदाहरंति यः समिधा य आहुती यो वेदेनेति समिधमेवापि श्रद्दधान आद
धन्मन्येत यऊइदमिति नमस्तस्मै य आहुत्या यो वेदेनेति विधयेवाप्युस्ति
प्रीतिस्तदेन स्मर्यंन्तषिरुवाच॥ अगोरुधाय गविषे द्युक्षाय दस्म्यं वचः॥ घृ
तात्स्वादीयो मधुनश्च वोचतेति वचएवमदइदं घृतात्स्व मधुनश्चे स्वादीयो
स्तिप्रीतिः स्वादीयोस्त्वित्येव तदाह॥ आतेअग्न ऋचा हविर्हृदा तष्टं भरामसि॥
तेते भवंतूक्षण ऋषभासो वशा उतेत्येतएवं उक्षाणश्च ऋषभाश्च व म
शाश्च भवंति य इमं स्वाध्यायमधीयत इति यो नमसा स्वध्वर इति नमस्कारे

णवै खल्वपि न वै देवा नमस्कारमति यज्ञो वै नम इति हि ब्राह्मणं भवति॥१॥
अथ सायंप्रातः सिद्धस्य हविष्यस्य जुहुयादग्निहोत्रदेवताभ्यः सोमा
य वनस्पतये ऽग्नीषोमाभ्यामिंद्राग्निभ्यां द्यावापृथिवीभ्यां धन्वंतरय
इंद्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे स्वाहेत्यथ बलिहरणमेताभ्यश्चै
व देवताभ्योऽद्भ्य ओषधि वनस्पतिभ्यो गृहाय गृहदेवताभ्यो वास्तुदे
वताभ्य इंद्रायेंद्रपुरुषेभ्यो यमाय यमपुरुषेभ्यो वरुणाय वरुणपुरुषे
प्रति ८ भ्यः सोमाय सोमपुरुषेभ्य इति दिशं ब्रह्मणे ब्रह्मपुरुषेभ्य इति मध्ये
विश्वेभ्यो देवेभ्यः सर्वेभ्यो भूतेभ्यो दिवाचारिभ्य इति दिवा नक्तंचारिभ्य
इति नक्तं रक्षोभ्य इत्युत्तरतः स्वधापितृभ्य इति प्राचीनावीती शेषं
दक्षिणा निनयेत्॥२॥ अथगृहबलिदेवा [illegible]

२ वसंतितेद्वारेपितामहंविंधात्रंकोणेचउमा पतिंआग्नेय्यांबलमर्दंच
यमंविष्णुंचदक्षिणे नैर्ऋत्यांस्कंदंवरुणंचसोमंसूर्यंचपश्चिमे॥वा
श्रौ यव्यामश्विनौवसवसोमोरुद्रंउत्तरस्यांदिशि॥ईशान्यांनक्षत्राणीद्रग्रहाः
पूर्वस्यांदिशि॥गृहमध्येब्रह्माणंप्रतिष्ठाप्यैतैऋद्धिःवृद्धिःश्रियाकीर्तिर
तितत्समार्च्यबलित्रयंगृहांगणेदेयंविहितंयेभूताःप्रचरंतिदिवानक्तं
बलिमिच्छंतोविदुरस्यप्रेष्ठाःतेभ्योबलिंपुष्टिकामोददामिमयिपुष्टिं
पुष्टिपतिर्ददातुस्वाहा॥ऐंद्रवारुणवायव्यौयाम्यांनैर्ऋतिकाश्रये॥तेका
द्वि काःप्रतिगृह्णंतुभूम्यांपिंडंमयार्पितं॥वैवस्वतकुलेजातौद्वौश्यामशब
लौशुनौ॥ताभ्यांपिंडोमयादत्तोरक्षेतांपथिमांसदा॥श्वचांडालभूतप २

तुनातिसकृन्मंत्रेणद्विस्तूष्णींकृताकृतमाज्यहोमेषुपरिस्तरणंतथाज्य
३ भागोपाकयज्ञेषुब्रह्माचधन्वंतरियज्ञश्शूलगववर्जमेषुषेस्वाहेतिजुहुया
दग्निरिंद्रःप्रजापतिर्विश्वेदेवाब्रह्मेत्यनादेशएकबर्हिरिध्माज्यस्विष्ट
कृतस्तुस्तुल्यकालाःसिदेषामिर्यज्ञगाथागीयते॥पाकयज्ञान्समासा
द्यैकाज्यानेकबर्हिषः॥एकःस्विष्टकृतःकुर्यान्नानापिसतिदैवते॥४॥
उदगयनेआपूर्यमाणपक्षेकल्याणेनक्षत्रेचौलकर्मोपनयनगोदा
नविवाहाःसार्वकालमेकेविवाहंतेषांपुरस्ताच्चतस्रआज्याहुतीर्जु
हुयादग्नआयूंषिपवसइतितिसृभिःप्रजापतेनत्वदेतान्यन्यइतिचव्या
हृतिभिर्वासिमुच्चयमेकेनेकेकांचनंत्वमर्यमाभवसियत्कनीनामिति ३
विवाहचतुर्थीभिः॥५॥कुलमग्रेपरीक्षेतयेमातृतःपितृतश्चेतियथोक्तं

तितुवायसेभ्योन्नंभस्मो निक्षिपेत्॥गोदोहनमात्रंतत्रस्थित्वा॥अतिथिमाकां
क्षेत्॥हस्तोपादौप्रक्षाल्याचम्यागृहंप्रवेशयेत्॥शंनःपृथिवीशिवमंतरिक्षं
द्यौर्नोदेह्यभयंनोअस्तु॥शिवादिशःप्रदिशउद्दिशोनआपोविद्युतःपरिपां
तुसर्वतःशांतिःशांतिःशांतिः॥३॥अथखलुयत्रक्वचहोष्यन्स्यादिषुमात्रा
वरंसर्वतस्थंडिलमुपलिप्योल्लिख्यषड्लेखाउदगायतांपश्चात्प्रागायते
नानांतयोस्तिस्त्रोमध्येतदभ्युक्ष्याग्निंप्रतिष्ठाप्यान्वाधायपरिसमुह्य
परिस्तीर्यपुरस्ताद्दक्षिणतःपश्चादुत्तरतइत्युदक्संस्थंतूष्णींपर्युक्षणं
पवित्राभ्यामाज्यस्योत्पवनमप्रच्छिन्नाग्रावनंतर्गर्भौप्रादेशमात्रौकुशौ
नानांतयोर्गृहीत्वांगुष्ठोपकनिष्ठिकाभ्यांमुत्तानाभ्यांपाणिभ्यांसवितु
ष्ट्वाप्रसवउत्पुनाम्यच्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिरितिप्रागु

पुरस्ताद्बुद्धमतेकन्यां [illegible] प्रयच्छेद्बुद्धिरूपशीललक्षणसंपन्नामरोगामु
पयच्छेत्दुर्विज्ञेयानिलक्षणान्यष्टौपिंडान्कृत्वाऋतमग्रेप्रथमंजज्ञेऋते
सत्यंप्रतिष्ठितं॥यदियंकुमार्यभिजातातदियमिहप्रतिपद्यतांयत्सत्यं
तद्दृश्यतामितिपिंडानभिमंत्र्यकुमारींब्रूयादेषामेकंगृहाणेतिक्षेत्रा
च्चेदुभयतःसस्याद्गृह्णीयादन्नवत्यस्याःप्रजाभविष्यतीतिविद्याद्गोष्ठा
त्पशुमतीवेदिपुरीषाद्ब्रह्मवर्चस्विन्यविदासिनोह्रदात्सर्वसंपन्नादेव
नात्कितवीचतुष्पथाद्द्विप्रव्राजिनीरिणादधन्याश्मशानात्पतिघ्नी॥६॥
अलंकृत्यकन्यामुदकपूर्वांदद्यादेष ब्राह्मोविवाहस्तस्यांजातोद्वादशा
वरान्द्वादशपरान्पुनात्युभयतः ऋत्विजेविततेकर्मणिदद्यादलंकृत्य
सदैवोदशावरान्दशपरान्पुनात्युभयतःसहधर्मंचरतइतिप्राजापत्यो

ष्टावरानष्टपरान्पु [illegible]
४ [illegible] नात्युभयतो गोमिथुनं दत्वोपयच्छेत स आर्षः सप्तावरान्सप्त
परान्पुनात्युभयतो मिथः समयं कृत्वोपयच्छेत स गांधर्वो धनेनोपतो
ष्योपयच्छेत स आसुरः सुप्तानां प्रमत्तानां वापहरेत् स पैशाचो हत्वाभि
त्वा च शीर्षाणि रुदतीं रुदद्भ्यो हरेत्स राक्षसः ॥ ६ ॥ अथ खलूच्चावचा जन
पदधर्मा ग्रामधर्माश्च तान्विवाहे प्रतीयाद्यत्तु समानं तद्वक्ष्यामः पश्चादग्ने
म र्दृषदं अश्मानं प्रतिष्ठाप्योत्तरपुरस्तादुदकुंभं समन्वारब्धायां हुत्वा ति
ष्ठन्प्रत्यङ्मुखः प्राङ्मुख्या आसीनाया गृभ्णामि ते सौभगत्वाय हस्तमित्यं ४
गुष्ठमेव गृह्णीयाद्यदि कामयीत पुमांस एव मे पुत्रा जायेरन्नित्यंगुलीरेव
स्त्रीकामो रोमांते हस्तं सांगुष्ठमुभयकामः प्रदक्षिणमग्निमुदकुंभं च

त्रिः परिणयं जपत्यमोहमस्मि सा त्वं सा त्वमस्यमो अहं द्यौरहं पृथिवी त्वं सा
सामाहमृक्त्वं तावेहि विवहावहै ॥ प्रजां प्रजनयावहै संप्रियौ रोचिष्णू सु
मनस्यमानौ जीवेम शरदः शतमिति परिणीय परिणीयाश्मानमारोहयतीम
मश्मानमारोहाश्मेव त्वं स्थिरा भव ॥ सहस्वा पृतनायतोभितिष्ठ पृतन्यत इति व
ध्वंजलावुपस्तीर्य भ्राता भ्राता वा स्थाने वा द्विर्लाजानावपति त्रिर्जामदग्न्यानां
प्रत्यभिघार्य हविरवत्तं चैषा वदानधर्मोर्यमणं नु देवं कन्या अग्निमयक्षत ॥
स इमां देवो अर्यमा प्रेतो मुंचातु नामुतः स्वाहा ॥ वरुणं नु देवं कन्या अग्निमयक्ष
त ॥ स इमां देवो वरुणः प्रेतो मुंचातु नामुतः स्वाहा ॥ पूषणं नु देवं कन्या अ
ग्निमयक्षत ॥ स इमां देवः पूषा प्रेतो मुंचातु नामुतः स्वाहेत्यविच्छिंदत्यंजलिं
स्रुचेव जुहुयादपरिणीय शूर्पपुटेनाभ्यात्मं तूष्णीं चतुर्थमोप्योप्य हैके

लाजान्परिणयंजितथोत्तमेजाहुतीनसन्निपतिजोजास्येशिखेविमुंचतियदि
५ कृतेभवतन्दुर्णास्तुकेकेशपक्षयोर्बद्धेभवतःप्रत्वामुंचामिवरुणस्यपाशा
दित्युत्तरामुत्तरयाथैनामपराजितायांदिशिसप्तपदान्यभ्युत्क्रामयती
षएकपद्यूर्जेद्विपदीरायस्पोषायत्रिपदीमायोभव्यायचतुष्पदीप्रजाभ्यः
पंचपद्यृतुभ्यःषट्पदीसखासप्तपदीभवसामामनुव्रताभव॥पुत्रान्विंदाव
हैबहूंस्तेसंतुजरदष्टयइत्युभयोःसंनिधायशिरसिउदकुंभेनावसिच्य
ब्राह्मण्याश्चवृद्धायाजीवपत्न्योजीवप्रजायाअगारएतांरात्रींवसेध्रुवमरुं
धतींसप्तऋषीनितिदृष्ट्वावाचंविसृजेतजीवपत्नीप्रजांविंदेयेति॥८॥प्रया
उपधपामानेपूषात्वेतोनयतुहस्तगृह्येतियानमारोहयेदश्मन्वतीरीयतेसंरभ ५
ध्वमित्यर्द्धर्चेननावमारोहेदुत्तरेणोत्तमयेजीवंरुदंतीतिरुदत्यांविवाहाग्नि

ग्निहोत्रेणप्रादुष्करणहोमकालौव्याख्यातौहोम्यंचमांसवर्ज्जंकामंतुव्रीहि
६ यवतिलैरग्नयेस्वाहेतिसायंजुहुयात्सूर्यायस्वाहेतिप्रातस्तूष्णींद्वितीयेउ
भयत्र॥१०॥अथपार्वणस्थालीपाकस्तस्यदर्शपूर्णयासाम्यामुपवासइध्मा
बर्हिषोश्चसंनहनंदेवताश्चोपांश्वयाजेंद्रमहेन्द्रवर्ज्जेकाम्याइतरास्तस्येतस्ये
देवतायेचतुरश्चतुरोमुष्टीन्निर्वपतिपवित्रेअंतर्धायामुष्मैत्वाजुष्टंनिर्वपामी
त्यथैनान्प्रोक्षतियथानिरुप्तममुष्मैत्वाजुष्टंप्रोक्षामीत्यवहतांस्त्रिःफलीकृ
तानानाश्रपयेत्समोप्यवायदिनानाश्रपयेद्विभज्यतंदुलानभिमृश्येदिदममु
ष्माइदममुष्माइतियद्युवेसमोप्यव्युद्धारंजुहुयाद्धृतानिहवींष्यभिघार्योद
गुद्वास्यबर्हिष्यासाद्येध्ममभिघार्यायंतइध्मआत्माजातवेदस्तेनेध्यस्व
वर्द्धस्वचेद्धवर्द्धयचास्मान्प्रजयापशुभिर्ब्रह्मवर्चसेनान्नाद्येनसमेधयस्वा ६

मग्नतोजस्त्रंनयंतिकल्याणेषुदेशुवृक्षस्वचतुष्पथेषुमाविदन्परिपंथिनइतिजपे
द्वासेवासेसुमंगलीरियंवधूरि तीक्षकानीक्षेतेहप्रियंप्रजयातेसमृध्यतामि
तिगृहंप्रवेशयेद्वास्त्वाग्निमुपसमाधायपश्चादग्नेरयानडुहंचर्मास्तीर्यप्राग्री
वमुत्तरलोमतस्मिन्नुपविष्टायांसमन्वारब्धायामानःप्रजांजनयतुप्रजापति
रितिचतसृभिःप्रत्यृचंहुत्वासमंजंतुविश्वेदेवाइतिदध्नःप्राश्यप्रतिप्रयच्छे
दाज्यशेषेणवानक्तिहृदयेअतऊर्ध्वमक्षारालवणाशिनौब्रह्मचारिणाव
लंकुर्वाणावधःशायिनौस्यातांत्रिरात्रंद्वादशरात्रंसंवत्सरंवैकऋषिर्जा
यतइतिचरितव्रतःसूर्याविदेवधूवस्त्रंदद्यादन्नंब्राह्मणेभ्योथस्वस्त्य
यनंवाचयीत॥८॥पाणिग्रहणादिगृह्यंपरिचरेत्स्वयंपत्न्यपिवापुत्रःकुमा
र्यंतेवासीवानित्यानुगृहीतस्याद्यदितूपशाम्येत्पत्न्युपवसेदित्येकेतस्या

दक्षिणा॥११॥अथपशुकल्पउत्तरतोग्नेःशामित्रस्यायतनंकृत्वोपाय
८ म यित्वापशुमाप्लाव्यपुरस्तात्प्रत्यङ्मुखमवस्थाप्याग्निंदूतमितिद्वाभ्यांहुत्वा
पलाशयार्द्रयाशाखयापश्चादुपस्पृशेदमुष्मैत्वाजुष्टमुपाकरोमीतिव्री
हियवमतीभिरद्भिःपुरस्तात्प्रोक्षत्यमुष्मैत्वाजुष्टंप्रोक्षामीतितासांपाययित्वा
दक्षिणमनुबाहुंशेषंनिनयेद्दाहंतेवपर्यग्निकृत्वोदंचंनयंतितस्यपुरस्तादुल्मु
कंहरंतिशामित्रएषभवतिवपाश्रपणीभ्यांकर्त्तापशुमन्वालभतेकर्त्तारंय
जमानःपश्चामिछोत्रस्यप्राक्शिरसंप्रत्यक्शिरसंवोदक्पादंसंज्ञप्यपु
रानाभेस्तृणमंतर्धायवपामुत्खिद्यवपामवदायवपाश्रपणीभ्यांपरिगृह्या ८
द्भिरभिषिच्यशामित्रेप्रताप्याग्रेणे नमग्निंहृत्वादक्षिणतआसीनःश्र
पयित्वापरीत्यजुहुयादितस्मिन्नेवाग्नौस्थालीपाकंश्रपयंत्येकादशापशो

ह्वेति तूष्णीमाघारावाघार्याज्यभागौ जुहुयादग्नये स्वाहा सोमाय स्वाहेत्यु
त्तरमाग्नेयं दक्षिणं सौम्यं विज्ञायते चक्षुषी वा एते यज्ञस्य यदाज्यभागौ तस्मा
त्पुरुषस्य प्रत्यङ्मुखस्यासीनस्य दक्षिणमक्ष्युत्तरं भवत्युत्तरं दक्षिणं मध्ये
हवींषि प्रत्यक्तरं वा प्राक्संस्थान्युदक्संस्थानि वोत्तरपुरस्तात्स्विष्टकृतं
मध्यात्पूर्वार्धाच्च हविषोऽवद्यति मध्यात्पूर्वार्धात्पश्चार्धादिति पंचावत्तिना
मुत्तरार्धात्स्विष्टकृतं नात्र हवींषि प्रत्यभिघारयति स्विष्टकृतं द्विरभिघा
रयति यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरं ॥ अग्निष्टत्स्विष्टकृद्वि
द्वान्सर्वं स्विष्टं सुहुतं करोतु मे ॥ अग्नये स्विष्टकृते सुहुतहुते सर्वप्रा
यश्चित्ताहुतीनां कामानां समर्द्धयित्रे सर्वान्नः कामान्त्समर्द्धय स्वाहेति
बर्हिषि पूर्णपात्रं निनयेदेष एवावभृथः पाकयज्ञानामेतत्तन्त्रं हविरुच्छिष्टं

रवदानैर्नो सर्वांगेभ्योऽवदाय शामित्रे श्रपयित्वा हृदयं शूले प्रताप्य स्था
लीपाकस्याग्रतो जुहुयादवदानैर्वा सहैके कस्यावदानस्य द्विर्द्विरवद्यत्या
वृतेव हृदयशूलेन चरंति ॥१२॥ चैत्ययज्ञे प्राक् स्विष्टकृतश्चैत्याय बलिं
हरेद्यद्यु वै विदेशस्थं पलाशदूतेन यत्र वेत्थ वनस्पत इत्येतं पर्णे द्वौ पिंडौ
कृत्वा वीवधेऽभ्याधाय दूताय प्रयच्छेदिमं तस्मै बलिं हरेति चैनं ब्रूयाद्यं तुभ्य
मिति यद्दूताय प्रतिभयं चेदं तत्र शस्त्रमपि किंचिद्दद्याच्चेन्नद्यंतरा प्लव
रूपमपि किंचिदनेन तरितव्यमिति धन्वंतरियज्ञे ब्रह्माणमग्निं चांतरा पुरो
दि हितायाग्रे बलिं हरेत् ॥१३॥ उपनिषे गर्भलंभनं पुंसवनमनवलोभनं
च यद्दिनाधीयात्तृतीये गर्भमासे तिष्येणोपोषितायाः सरूपवत्साया गोर्द पा
माषौ एवं च दधिप्रसृतेन प्राशयेत् किं पिबसि किं पिबसीति

पृष्टापुंसवनंपुंसवनमितित्रिः प्रतिजानीयादेवंत्रीन्प्रसर्त्तोनथास्यैमंड
८ लागारच्छायायांदाक्षिणस्यांनासिकायांमजीतामोषधीन्नस्तः करोतिप्र
जावज्जीवपुत्राभ्यांहैकेआतेगभोयोनिमेतुपुमान्बाणइवेषुधिं॥ आवी
रोजायतांपुत्रस्तेदमास्यः॥ अग्निरेतुप्रथमोदेवतानांसोस्यैप्रजांमुंचतु
मृत्युपाशात्॥ तदयंराजावरुणोनुमन्यतांयथेयंस्त्रीपौत्रमघंनरोदादि
तिप्राजापत्यस्यस्थालीपाकस्यहुत्वाहृदयदेशमस्याआलभेतयत्ते
मे सुसीहृदयेहितमंतः प्रजापतौ॥ मन्येहंमांतद्विद्वांसंमाहंपौत्रमघं
नियामिति॥१४॥ चतुर्थेगर्भमासेसीमंतोन्नयनंमापूर्यमाणपक्षेय ८
दापुंसानक्षत्रेणचंद्रमायुक्तः स्यादथाग्निमुपसमाधायपश्चादस्या
नडुहंचर्मास्तीर्यप्राग्ग्रीवमुत्तरलोमतस्मिन्नुपविष्टायांसमन्वारब्धायां

धातादधातुदाशुषइतिद्वाभ्यांकारामहमितिद्वाभ्यांनेजमेषप्रजापते
नत्वदेतान्यन्यइतिवाथास्यैयुग्मेनसटालुग्लप्सेनत्र्येण्याचशल
ल्यात्रिभिश्चकुशपिंजूलैरूर्ध्वंसीमंतंव्यूहतिभूर्भुवः स्वरोमिति
त्रिश्चतुर्वावीणागाथिनौसंशास्तिसोमंराजानंसंगायेतामितिसोमो
नोराजावतुमानुषीः प्रजानिविष्टचक्रासावितियांनदीमुपवसिथा
भवंतिब्राह्मण्यश्चवृद्धायाजीवपत्न्योजीवप्रजायदुपादिशेयुस्तत्त
कुर्युर्ऋषभोदक्षिणा॥१५॥ कुमारंजातंपुरान्यैरालंसर्पिर्मधुनीहिर भो
ण्यनिकाषंहिरण्येनप्राशयेत्प्रतेददामिमधुनोघृतस्यवेदंसवित्राप्र
त्राप्रसूतंमघोनां॥ आयुष्मान्गुप्तोदेवताभिः शतंजीवशरदोलोकेअस्मिन्नि त्वो
तिकर्णयोरुपनिधायमेधाजननंजपतिमेधांतेदेवः सवितामेधांदेवी
सरस्वती॥ मेधांतेअश्विनौदेवावाधत्तांपुष्करस्रजावितित्यांसावभिमृ

⑦

शंत्यश्मा भव परशुर्भव हिरण्यमस्तृतं भव ॥ वेदो वै पुत्रनामासि स जीव शा
रदः शतमितीन्द्रश्रेष्ठानि द्रविणानि धेह्यस्मे प्रयंधि मघवन्नृजी
९ षिन्निति चैनामकरोमेदधु घोषि वदक्षं चेतरं तस्तिष्ठमभिनिष्ठानां लब्ध
तुरक्षरं रं क्षेत्रे वोद्यक्षरं प्रतिष्ठाकामश्चतुरक्षरं ब्रह्मवर्चसकामो युग्मानि
त्वेव पुंसामयुजानि स्त्रीणामभिवादनीयं च समीक्षेत तन्मातापितरौ
विद्यातामोपनयनात् प्रवासादेत्य पुत्रस्य शिरः परिगृह्य जपेत्यं
गादंगात्संभवसि हृदयादधिजायसे आत्मा वै पुत्रनामासि स जी
व शरदः शतमिति मूर्द्धनि त्रिरवघ्रायां वृतेनैव कुमार्यै ॥१६॥
षष्ठे मास्यन्नप्राशनं आजमन्नाद्यकामस्तैत्तिरं ब्रह्मवर्चसकामो घृतोदनं ९
तेजस्कामो दधिमधुघृतमिश्रमन्नं प्राशयेदन्नपतेन्नस्य नो देह्यनमी
दध्योदनमिंद्रियकामः क्षीरौदनं पशुकामो मधोदनमायुष्कामो

प्रच्छिद्य
वपतेदमस्यायुष्यां जरदष्टिर्यथासदिति प्रच्छियैश्राग्रांच्छमीपर्णैः सह
१० मात्रे प्रयच्छति ता आनडुहे गोमये निदधाति ॥ येन धाता बृहस्पतेरग्नेरिंद्रस्य
चायुषेवपत् ॥ तेन त आयुषे वपामि सुश्लोक्याय स्वस्तय इति द्वितीयं ॥ येन
भूयश्च रात्र्यां ज्योक् च पश्याति सूर्यम् ॥ तेन त आयुषे वपामि सुश्लोक्याय
इति तृतीयं सर्वैर्मंत्रैश्च चतुर्थमेवमुत्तरतस्त्रिः क्षुरमेजोनिमजेध्यात्क्षुरे
णोमर्चयतास्कपेशसावसाव पशिकेशान्नु ॥ शुंधि शिरो मास्यायुः प्रमोषी
रिति नापितं शिष्याच्छीतोष्णाभिरद्भिरर्थं कुर्वाणोक्षण्वन्कुशलीकुर्विति
यथाकुलधर्मं केशवेशान्कारयेदावृता वकुमार्यै ॥१८॥ एतेन गोदानं
षोडशे वर्षे केशान्तेद्विह तु श्मश्रुशब्दान्कारयेद्यथेच्छश्मश्रूणीहोदाति शुंधि १०
शिरो मुखं मास्यायुः प्रमोषीरिति केशश्मश्रुलोमनखान्युदक्संस्थानि

10

वस्यभुष्मिणः॥ प्रप्रदातारं तारिष ऊर्ज्जं नो धहि द्विपदे चतुष्पद इत्यादौ नै
वकुमार्यै॥१७॥ तृतीये वर्षे चौलं यथाकुलधर्मं वोत्तरतोग्नेर्व्रीहियवमाष
तिलानां पृथक् पूर्णशरावाणि निदधाति पश्चात्कारयिष्यमाणो मातुरुपस्थ आ
नडुहं गोमयं न वेश शावे शमीपर्णानि चोपनिहिता भवंति मातुः पिता दक्षिणत ए
कविंशतिकुशपिंजूलान्यादाय ब्रह्मो वैतानि धारये पश्चात्कारयिष्यमाणस्याव स्था
यशीतोष्णाश्र अपः समानीयोष्णेन वाय उदकेनेहीति तासां गृहीत्वा नवनीतं
दधिद्रप्सान्वा प्रदक्षिणं शिरस्त्रिरुंदत्यदितिः केशान्वपत्वाप उंदंतु वर्चस इ
ति दक्षिणे केशपक्षे त्रीणि त्रीणि कुशपिंजूलान्यभ्यात्माग्राणि निदधात्यो
षधे त्रायस्वैनं श्रंछिं धां स्वधिते मैनं हिंसीरिति निष्पीडय लोहेन क्षुरेण प्रछि
नत्ति येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्॥ तेन ब्रह्माणो

कुर्विति संप्रेष्यत्याप्लुत्य भग्यतः स्थित्वाहः शेषमाचार्यसकाशे वाचं विसर्जेत
वरं ददामीति गोमिथुनं दक्षिणा संवत्सर मोद्धिमोत्र॥१८॥ अष्टमे वर्षे ब्राह्मणमु
पनयेद्गर्भाष्टमे वैकादशे क्षत्रियं द्वादशे वैश्यमाषोडशाद्ब्राह्मणस्यानतीतः
आद्वाविंशात्क्षत्रियस्याचतुर्विंशाद्वैश्यस्यात ऊर्ध्वं पतितसावित्रीका
भवंति नैनानुपनयेन्नाध्यापयेन्न याजयेन्नैभिर्व्यवहरेयुरलंकृतं कुमारं कु
शलीकृतशिरसमहतेन वाससा संवीतमैणेयेन वाजिनेन ब्राह्मणं रौरवेण क्ष
त्रियमाजेन वैश्यं यद्ध वासांसि वसीरन्त्रक्तानि वसीरन्काषायं ब्राह्मणो मांजि
ष्टं क्षत्रियो हारिद्रं वैश्यस्तेषां मेखला मौंजी ब्राह्मणस्य धनुर्ज्या क्षत्रियस्या
वी वैश्यस्य तेषां दंडाः पालाशो ब्राह्मणस्यौदुंबरः क्षत्रियस्य बैल्वो वैश्यस्य
केशसंमितो ब्राह्मणस्य ललाटसंमितः क्षत्रियस्य प्राणसंमितो वैश्यस्य॥२०॥

1r

११

सर्वेगासर्वेषांसमन्वारब्धेहुत्वोत्तरतोग्नेःप्राङ्मुखआचार्योवतिष्ठतेपु
रस्तात्प्रत्यङ्मुखइतरोपामंजलीपूयिरत्वोत्तरस्वोतत्सवितुर्वृणीमहइतिपूर्णेना
स्यपूर्णमवक्षारयत्यासिच्च्येदेवस्यत्वासवितुप्रसवेश्विनोर्बाहुभ्यांपूष्णोह
स्ताभ्यांहस्तंगृह्णाम्यसावितितस्यपाणिनापाणिंसांगुष्टंगृह्णीयात्सवि
तातेहस्तमग्रभीदसावितिद्वितीयमग्निराचार्यस्तवासावितितृतीयमादि
त्यमीक्षयेद्देवसवितरेषते ब्रह्मचारीतंगोपायसमामृतेत्याचार्यःक
स्यब्रह्मचार्यसिप्राणस्यब्रह्मचार्यसिकस्त्वाकमुपनयतेकायत्वापरिददा
मीतियुवासुवासाःपरिवीतआगादित्यर्द्धर्चेनैनंप्रदक्षिणमावर्त्तयेत्तस्या ११
प्यंसौपाणीकृत्वाहृदयदेशमालभतेत्तरेणाग्निंपरिसमुह्यब्रह्मचा
रीतूष्णींसमिधमादध्यात्तूष्णींवैप्राजापत्यंप्राजापत्योब्रह्मचारी

भवतीतिविज्ञायते॥२१॥मंत्रेणहैकेऽग्नयेसमिधमाहार्षंबृहतेजातवेदसे॥
तयात्वमग्नेवर्द्धस्वसमिधाब्रह्मणावयंस्वाहेतिससमिधमाधायाग्निमुप
स्पृश्यमुखंनिमार्ष्टित्रिस्तेजसामासमनज्मीतितेजसाह्येवात्मानंसमन
क्तीतिविज्ञायते॥मयिमेधांमयिप्रजांमय्यग्निस्तेजोदधातुमयिमेधांमयि
प्रजांमयीइंद्रियंदधातुमयिमेधांमयिप्रजांमयिसूर्योभ्राजोदधातुयत्तेअ
ग्नेतेजःस्तेनाहंतेजस्वीभूयासंयत्तेअग्नेवर्चस्तेनाहंवर्चस्वीभूयासंयत्ते
अग्नेहरस्तेनाहंहरस्वीभूयासमित्युपस्थायजान्वाच्योपसंगृह्यब्रूयाद
धीहिभोसावित्रींभो३अनुब्रूहीतितस्यवाससापाणिभ्यांचपाणिसं
गृह्यसावि त्रीमन्वाहपच्छोर्द्धर्चशःसर्वांयथाशक्तिवाचयीतहृदय
देशेस्योर्ध्वांगुलिंपाणिमुपदधातिममव्रतेहृदयंतेदधामिममचित्तं

12

१२

मनुचित्तं ते अस्तु ॥ ममवाचमेकव्रतो जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यमि
ति ॥२२॥ मेख लामाबध्य दंडं प्रदाय ब्रह्मचर्यमादिशेत् ब्रह्मचार्यस्यपो
ऽशानकर्म कुरु दिवामास्वाप्सीराचार्याधीनो वेदमधीष्वेति द्वादशवर्षाणि वेदब्र
ह्मचर्यं गृहणान्तं वा सायंप्रातर्भिक्षेत सायंप्रातः समिधमादध्यात् प्रत्याख्या
यं न मग्रे भिक्षेत प्रत्याख्यायिनीं वा भवान्भिक्षां ददात्वित्यनुप्रवचनीमिति
वा तदाचार्याय वेदयीत तिष्ठेदहः शेषमस्तमिते ब्रह्मौदनमनुप्रवचनीयं श्रप
यित्वाचार्याय वेदयीताचार्यः समन्वारब्धे जुहुयात् सदसस्पतिमद्भुतमिति
सावित्र्या द्वितीयं यथर्षि चातदूर्ध्वमनूक्तेभ्य ऋषिभ्यस्तृतीयं सौविष्ट
कृतं चतुर्थं ब्राह्मणान्भोजयित्वा वेदसमाप्तिं वाचयीतात ऊर्ध्वमक्षारल
वणाशी ब्रह्मचार्यधःशायी त्रिरात्रं द्वादशरात्रं संवत्सरं वा चरितव्रताय १२

१३

सप्तदर्शां कौषीतकिनः समामनंति सकर्मणामुपद्रष्टा भवतीति तदुक्तं
मग्न्याधेयमृत्विजो बहुधा कल्पयंत इति होतारमेव प्रथमं वृणीतेऽग्निर्मे हो
ता स मे होता होतारं त्वामुद्वृण इति होतारं चंद्रमा मे ब्रह्मा स मे ब्रह्मा ब्रह्मा
णं त्वामुद्वृण इति ब्रह्माणमादित्यो मेऽध्वर्युरित्यध्वर्युं पर्जन्यो म उद्गातेत्यु
द्गातारमापो मे होत्राशंसिन्य इति होत्रकांश्चमसा मे चमसाध्वर्यव इति च
मसाध्वर्यूनाकाशो मे सदस्य इति सदस्यं स वृतो जपेन्महन्मे वोचो भर्गो मे
वोचो भर्गो मे वोचो यशो मे वोचः स्तोमं मे वोचः क्लृप्तिं मे वोचो भुक्तिं मे वोच
स्तृप्तिं मे वोचः सर्वं मे वोचदिति जपित्वाग्निष्टे होता स ते होता होताहं ते
मानुष इति होता प्रतिजानीते चंद्रमास्ते ब्रह्मा स ते ब्रह्मा ब्रह्मैव मितरे
यथादेशं तन्मामवतु तन्मा विशतु तेन भुक्षीषीयेति च याजयिष्यन्त्स्त १३

मेधाजननंकरोत्पनिंदितायांदिश्येकमूलंपलाशंकुशस्तंबंवापलाशाप्रचारे
प्रदक्षिणमुदकुंभेनत्रिःपरिषिंचंतंवाचयतिसुश्रवःसुश्रवाअसीतियथात्वं
सुश्रवःसुश्रवाअस्येवंमांसुश्रवःसौश्रवसंकुरुयथात्वंदेवानांयज्ञस्यनि
धिपोस्येवमहंमनुष्याणांवेदस्यनिधिपोभूयासमित्येतेनवापनादिपरि
दानांतंत्रंतादृशानंव्याख्यातमित्यनुपेतापूर्वस्याथोपेतपूर्वस्यकृताकृते
केशवपनेमेधाजननंचानिरुक्तंपदानंकालश्चतत्सवितुर्वृणीमहइतिसा
वित्री॥२३॥ऋत्विजोवृणीतेन्यूनानतिरिक्तांगान्येमातृतःपितृतश्चेति
यथोक्तंपुरस्ताच्चूनऋत्विजोवृणीतइत्येकेब्रह्माणमेवप्रथमंवृणीते
थहोतारमथाध्वर्युमथोद्गातारंसर्वान्वायेहीनेकाहेर्याजयंतिसदस्य

मार्त्विजमकार्यमहीनस्यनीचदक्षिणस्यव्याधितस्यातुरस्ययक्ष्मगृहीतस्या
नुदेश्यमिज्ञास्तस्यक्षिप्रयोनेरितिचैतेषांसोमप्रवाकंपरिपृच्छेत्कोयज्ञःके
ऋत्विजःकादक्षिणेतिकल्याणैःसहसंप्रयोगोनमांसमश्नीयुर्नस्त्रिय
मुपेयुराक्रतोरपवर्गादेतेनाग्नेर्ब्रह्मणावावृधस्वेतिदक्षिणागावाज्याहु
तिंहुत्वायथार्थंप्रव्रजेदेवमनाहिताग्निर्गृह्येरमामग्नेसुरणीमीमृषोन
इत्येतयर्चा॥२४॥ऋत्विजोवृत्वामधुपर्कमाहरेत्स्नातकायोपस्थितायराज्ञे का ६
न्वाचार्यश्वशुरपितृव्यमातुलानांचदधनिमध्वानीयसर्पिर्वामध्वलाभेवि
ष्टरःपाद्यमर्घ्यमाचमनीयंमधुपर्कोगौरित्येतेषांत्रिस्त्रिरेकैकंवेदयंते॥
अहंवर्ष्मसजातानांविधुतामि [illegible]
[illegible]

१४ मग्नेब्राह्मणायप्रयच्छेत्तामग्यंशूद्रायप्रक्षालितपादोर्घ्यमंजलिनाप्रतिगृ
ह्याथाचमनीयेनाचामत्यमृतोपस्तरणमसीतिमधुपर्कमाह्रियमाण
मीक्षते मित्रस्यत्वाचक्षुषाप्रतीक्षइतिदेवस्यत्वासवितुःप्रसवेश्विनोर्बा
हुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामीतितदंजलिनाप्रतिगृह्यमधुवा सव्ये पाणौ कृत्वा
ताऋतायतइतित्र्यचेनावेक्ष्यानामिकयाचांगुष्ठेनचत्रिःप्रदक्षिणमालो
सा६ ड्यवसवस्त्वागायत्रेणछंदमन्थयंत्विति पुरस्तान्निमार्ष्टिरुद्रास्त्वात्रैष्टु
भेनछंदसाभक्षयंत्विति दक्षिणतआदित्यास्त्वाजागतेनछंदसाभक्ष
आ यंत्विति पश्चाद्विश्वेत्वादेवानुष्टुभेनछंदसाभक्षयंत्वित्युत्तरतोभू १४
तेभ्यस्त्वेतिमध्यात्त्रिरुद्गृह्य विराजोदोहोसीतिप्रथमंप्राश्नीयाद्वि
राजोदोहमशीयेतिद्वितीयंमयिदोहःपद्यायैविराजइतितृतीं

१५ मात्रायेनाभिजुहोतिशंनोभवंतुवाजिनोहवेष्वित्युल्काधानाअंजलिनामात्येभ्य
इतराद्धानाकलशात्सक्तूनांदर्वींपूरयित्वाप्रागुपनिष्क्रम्यशुचौदेशेपो
वनिनीयसर्पदेवजनेभ्यःस्वाहेतिहुत्वानमस्करोतियेसर्पाःपार्थिवायेअं
तरिक्ष्यायेदिव्यायेदिश्यास्तेभ्यइमंबलिमाहार्षंतेभ्यइमंबलिमुपाकरोमी
तिप्रदक्षिणंपरीत्यपश्चाद्बलेरुपविश्यसर्पोसिसर्पतांसर्पाणामधिपति
रस्यंनेनमघ्वोनुस्त्रायसेपूपेनसर्पोन्यंदेवांस्त्वयिमासंतंत्वयिसंतः
सर्पामांहीसिषुर्ध्रुवांतेपरिददामीतिध्रुवामुंतेध्रुवामुंतइत्यमात्याननुपूर्वं
ध्रुवमांतेपरिददामीत्यात्मानमंततोनेनमंत्रराव्येवयुरापरिदांभ्यात्सर्प
देवजनेभ्यःस्वाहेतिसायंप्रातर्बलिंहरेदाप्रत्यवरोहणात्प्रसंख्यायैहेके १५
नावृतोबलींस्तदहरेवोपहरंति॥१॥आश्वयुज्यामाश्वयुजीकर्मनिवेशन

15

येंनसर्वंनतृप्तिंगच्छेद्ब्राह्मणायोदद्युःच्छिष्टंअथच्छेदकामेभ्यसर्वंवीथाच्चमनी
येनाचाम्यामृतापिधानमसीतिसत्यंयशःश्रीर्मयिश्रीःश्रयतामितिद्वि
तीयमाचान्तोदकायगांवेदयंतेहतोमेपाप्मापाप्मामेहतइतिजपित्वोंकुरु
तेतिकारयिष्यन्मातारुद्राणांदुहितावसूनामितिजपित्वोमुत्सृजेतेत्यु
त्स्रक्ष्यंन्नामांसोमधुपर्कोभवतिभवति॥२४॥इत्याश्वलायनगृह्यसूत्रे
प्रथमोध्यायः॥ॐश्रवण्यांपौर्णमास्यांश्रवणाकर्माक्षतसक्तूनांनवंक
लशंपूरयित्वादर्वींरच्चबलिहरणींनवेशिक्येनिदधात्यक्षतधानाःकृत्वा
सर्पिषाद्वजिनत्यस्तमितेस्थालीपाकंश्रपयित्वैककपालंचपुरोळाशमग्नेन
यसुपथारायेअस्मानितिचतसृभिःप्रत्यृचंहुत्वापाणिनैककपालमच्युताय
भौमायस्वाहेत्यविप्लुतंस्यादाविःपृष्ठोवामानोअग्नेवसज्ञोआथ्यायेत्येन

१६

भृयादित्यग्निमीक्षमाणोजपतिशिवोनःसुमनाभवेतिहेमंतंमनसाध्याया
त्यश्चादग्नेस्वस्तरस्वास्तीर्णस्तस्मिन्नुपविश्यस्योनापृथिविभवेतिजपि
त्वासंविशत्सामात्यःप्राक्शिराउदङ्मुखोयथावकाशमितरेज्यायाज्याया
न्यानंतरोमंत्रविदोमंत्रान्जपेयुःसंहायातोदेवाअवंतुनइतित्रिरंगान्दक्षि
दक्षिणामुखाःप्रत्यङ्मुखाउदङ्मुखाश्चतुर्थंसंहायसौर्याणिस्वस्त्ययनानि
चजपित्वान्नंसंस्कृत्यब्राह्मणान्भोजयित्वास्वस्त्ययनंवाचयीत॥३॥हेमंत
शिशिरयोश्चतुर्णामपरपरपक्षाणामष्टमीष्वष्टकाएकस्यांवापूर्वेद्युःपि
तृभ्योदद्यादोदनंकृसरंपायसंचतुःशरावस्यवाष्टपानुदीरतामवरउत्परास
इत्यष्टाभिर्हुत्वायावतीभिर्वाकामयीताथश्वोभूतेष्टकापशुनास्थाली
पाकेनचाप्यनडुहोयवसमाहरेदग्निनावाकक्षमुपोषेदेषामेष्टकेति

१६

16

मलंकृत्य स्नाताः शुचिवाससः पशुपतये स्थालीपाकं निरुप्य जुहुयु पशुपत
ये शिवाय शंकराय पृषातकाय स्वाहेति पृषातकमंजलिना जुहुयादूनं मे पूर्य
तां पूर्णं मे मोपसदत्पृषातकाय स्वाहेति सजूर्ऋतुभिः सजूर्विधाभिः सजूरिं
द्राग्निभ्यां स्वाहा॥ सजूर्ऋतुभिः सजूर्विधाभिः सजूर्विश्वेभ्यो देवेभ्यः स्वाहा॥
सजूर्ऋतुभिः सजूर्विधाभिः सजूर्द्यावापृथिवीभ्यां स्वाहेत्याहिताग्ने राग्रय
णस्थालीपाको नाहिताग्नेरपि शूलाग्नौ॥२॥ मार्गशीर्ष्यां प्रत्यवरोहणं च
तुर्दश्यां पौर्णमास्यां वा निवेशनं पुनर्वा कृत्यल्लिपनास्तरणो प्रस्तरणे रस्त
मिति पायसस्य जुहुयुरपश्चेन पदा जहि पूर्वेण चापरेण च॥ सप्त च वारुणी
रिमाः सर्वाश्च राजबांधवीः स्वाहा॥ न वैश्वेतश्चाध्यागारे हिर्जघान किंच
न॥ श्वेताय वैदार्वायन म स्वाहेति नात्र सोविष्टकृद भयं नः प्राजापत्येभ्यो

यि परमेष्ठी दधातु स्वाहा॥ प्रजापते न त्वदेतान्यः सौविष्टकृत्यष्टमी ब्राह्मणभोज
यदित्युक्तं॥४॥ अपरेद्युरन्वष्टक्यं तस्यैव मांसस्य प्रकल्प्य दक्षिणाप्रवणेऽग्नि
१८ मुपसमाधाय परिश्रित्यान्नरतः परिश्रितस्य द्वारं कृत्वा समूलं बर्हिस्त्रिरपस
लैरविधून्वन्प्रस्तीर्य हविष्यां सादयेदोदनं कृसरं पायसं दधिमंथं मधुमं
थं च पिंडपितृयज्ञेन कल्पेन हुत्वा मधुमंथवर्जं पितृभ्यो दद्यात् स्त्रीभ्यश्च सुरा
चाचाममित्यधिकं कर्षके द्वयोः षट्सु वा पूर्वासु पितृभ्यो दद्यादपरासु स्त्रीभ्यः
एतेन माघ्यावर्षं प्रोष्ठपद्यामपरपक्षे मासि मासि चैवं पितृभ्यो युक्षु प्रतिष्ठाप
येऽन्नं वावरान्भोजयेदयुजो वा युग्मान्वृद्धि पूर्तेषु युग्मानितरेषु प्रदक्षिणमुपचा
रो वेस्तिलार्थैः॥५॥ रथमारोक्ष्यन्नानापाणिभ्यां चक्रेऽभिमृश्योदहं ते पूर्वं पा १८
दावात्मने बृहद्रथंतरे ते चक्रे वामदेव्यमक्ष इत्यक्षाधिष्ठाने दक्षिणपूर्वाभ्या
मारोहेच्छायो च्छावीयैर्णा रोहामीद्रस्योजसाधिपत्येनेति रश्मीन्त्संमृशेद

मे.द. २

त्येतानष्टकः स्यानोहैके वैश्वदेवीं ब्रुवत आग्नेयीमेके सौर्यामेके प्रा[illegible]पत्यामेके रा
त्रिदेवतामेके नक्षत्रदेवतामेक ऋतुदेवतामेके पितृदेवतामेके पशुदेवतामेके पशु
कल्पेन पशुं संज्ञप्य प्रोक्षणोपाकरणवर्जं वपामुत्खिद्य जुहुयाद्वह वपां जात
वेदः पितृभ्यो यत्रैतान्वेत्थ निहितान्पराके मेदसः कुल्या उपैनांत्स्रवंतु सत्या एता
आशिषः संतु सर्वाः स्वाहेत्यथावदानानां स्थालीपाकस्य[illegible]ग्ने नय सुपथा राये अ
स्मानिति ग्रीष्मो हेमंत ऋतवः शिवा नो वर्षाः शिवा अभयाः शरन्नः ॥ संवत्सरो धि
पतिः प्राणदो नोहोरात्रे कृणुतां दीर्घमायुः स्वाहा ॥ शं ना पृथिवी शिवमंतरिक्षं
द्यौर्नो दिव्यमभयं नो अस्तु ॥ शिवा दिशः प्रदिश उद्दिशो न आपो विद्युतः परिपांतु
सर्वतः स्वाहा ॥ आपो मरीचीः प्रवहंतु नो धियो धाता समुद्रो वहंतु पापं ॥ भूतं
भविष्यदभयं विश्वमस्तु मे ब्रह्माधिगुप्तः स्वाराक्षराणि स्वाहा ॥ विश्व आदित्या व
सवश्च देवा रुद्रा गोप्तारो मरुतः सदंतु ॥ ऊर्जं प्रजाममृतं पिन्वमानः प्रजापतिर्मे

प्रवणे साभां मापयेत्साध्वता हु भवंति युवानस्तस्यां कितवाः कलहिनः प्रमायुका
भवंति यत्र सर्वत आपः प्रस्यंदेरंस्तास्वस्यथन्य धृताच्च ॥७॥ अथैते वास्तुपरी
१८ क्षितं जानुमात्रं गर्तं खात्वा तैरेव पांसुभिः प्रतिपूरयेदधिके प्रशस्तं समे वार्त्तं न्यूने
गर्हितमस्तमिते पां पूर्णं परिवासयेत्सोदके प्रशस्तमार्द्रे वार्तं शुष्के गर्हितं श्वे
तं मधुरास्वादं सिकतानं ब्राह्मणस्य लोहितं क्षत्रियस्य पीतं वैश्यस्यत सहस्र
सीतं कृत्वा यथादिकु समचतुरस्रां मापयेदायतचतुरस्रां वा तत्र शमीशाखयोदुंबर
शाखया वा शंतातीयेन त्रिः प्रदक्षिणं परिव्रजन्प्रोक्षेत्यविच्छिन्नया चोदकधा
रयापो हिष्ठा मयोभुव इति ऋचेनवं शांसरेषु शरणानि कारयेद्गर्तेष्ववकां शी
पालमित्यवधापयेन्नास्य दोदुको भवतीति विज्ञायते मध्यमस्थूणायां गर्ते व
धाय प्रागग्रानुदगग्रान्कुशानास्ती[illegible]प आसिच्य यदच्युता १८
मोमाय स्वाहेत्यथैनामुच्छ्रीयमाणामनुमंत्रयते इहैव तिष्ठ निमिता ति

18

रश्मिमक्रान्त्वा दृढेन ब्रह्मणा अस्तेऽभासं गच्छामि सत्येनुर्वैः संगच्छामीत्यभिप्र
वर्त्तमानेषु उपेत्य सहस्रेस नेवाउमभिवत्तस्विरथदेवप्रवहनस्य नेवीड्वंगो हि ना२
भूयाइत्येतयान्यान्यपि वानस्पत्यानि स्थिरौ गावौ भवतां वीळुरक्षइति रथां
गमभिमन्त्र्य सुत्रामाणं पृथिवीं द्यामनेहसमिति नावं नवरथेन यज्ञास्तिनं
वृक्षं ह दं वा विदासीनं प्रदक्षिणं कृत्वा फलवतीः शाखा आहरेदन्यद्वाको
ढुं बं संसदमुपयायादस्माकमुत्तमं कृधीत्यादित्यमीक्षमाणो उपितावृरोहे
दृषभं मासमानानामभिक्रामन्त्वयमग्ने इन्द्रस्य प्रेष्ठा इत्युत्तरयात्यादित्येन द्वा
दिवो दुहितरो विभातीरिति व्युष्टायां ॥६॥ अथातो वास्तुपरीक्षा अनूखरमवि
वदिष्णुभूमौषधिवनस्पतिवृद्धमित्कुशवीरणं प्रभृतेन कंटकिक्षीरिणस्तु
सम्मूलान्युत्खायोद्वासयेदपामार्गशाकतिल्वकः परिव्याधइति चैतानि
यत्र सर्वत आपो मध्यं समेत्य प्रदक्षिणं शयनीयं परीत्य प्राच्यस्यंदेरन्नप्र
वदंत्यस्तत्सर्वं समृद्धं समवस्रवेद्धनकारणं कारयेद्धुकुंनं हभवति दक्षिणा
णं

लास्तां मिरावतीमध्ये पोषस्त्वतिष्ठंतीमू ॥ आत्वाप्रापन्नघायवआत्वाकुमारस्तरु
ण आवत्सो जायतां सह ॥ आत्वा परिश्रितः कुंभ आदध्नः कलशैरयन्निति ॥७॥
वंशमाधीयमानमृतेन स्थूणामधिरोह वंश द्राघीय आयुः॥ प्रतरं दधानादृति
सदूर्वासु चमस्तस्कंधेषु शिलासमणिकं प्र प्रतिष्ठापयेत्पृथिव्या अधिसंभवेत्य
रंगरोवावदीतिन्द्रेधावद्वेपरन्नथा॥ इरामुहप्रशंसत्यनिरामपबाधतामिति
वाथास्मिन्नप उसिचयेदेतु राजावरुणो रेवतीभिरस्मिन्स्थाने तिष्ठतु मो
दमानः॥ इरां वहंतो घृतमुक्षमाणा मित्रेण साकं सह संविशंत्वित्यथैनच्छ
मयति व्रीहियवमतीभिरद्भिर्हिरण्यमवधाय शंतातीयेनः त्रिप्रदक्षिणं परि
व्रजन्प्रोक्षत्यविच्छिन्नया चोदकधारया आपोहिष्ठामयोभुव इति तृचेन मध्ये
गारस्य स्थालीपाकं श्रपयित्वा वास्तोष्पते प्रतिजानीह्यस्मानिति चत

सभिःप्रत्यृचंहुत्वान्नेनसंस्थाप्यब्राह्मणान्भोजयित्वाशिवंवास्तुशिवंवास्त्वि
तिवाचयीत॥९॥उक्तमग्रहस्यप्रपदनंबीजवतोग्रहाश्रपद्यतक्षेत्रंप्रकर्षयेदुत्त
रैःप्रोष्ठपदैःफल्गुनीभीरोहिण्यावाक्षेत्रस्यानुवातंक्षेत्रस्यपतिनावयमि
तिप्रत्यृचंजुहुयाज्जपेद्वागाःप्रतिष्ठमानाअनुमंत्रयेतमयोभूर्वातोअभि
वातुस्रांइतिद्वाभ्यामायतीयसामृधश्चतुबिलंर्मधोःपूर्णंघृतस्यच॥
तानःसंतुपयस्वतीर्बह्वीर्गोष्ठेघृताच्यः॥उपमेतुमयोभुवऊर्जंचौ
जश्चबिभ्रतीः॥दुहानाक्षितंपयोमयिगोष्ठेनिविशाध्वंयथाभवास्युत्तमो
यादेवेषुतन्वमैरयंतेतिचुस्रुक्तशेषमागावीयमेकेगणानासामुप
तिष्ठेतागुरुगवीनांभृतामस्थप्रशस्तास्थशोभनाःप्रियाःप्रियोवोभू

यासंरांमयिजोष्टंनीतंमयिजानीध्वम्॥१०॥इतिअश्वलायनगृह्यसूत्रे
द्वितीयोध्यायः॥२॥श्रीसांब॥ॐनमः॥अथापंचयज्ञादेवयज्ञोभूतयज्ञःपितृ
यज्ञोब्रह्मयज्ञोमनुष्ययज्ञइतितद्यदग्नौजुहोतिसदेवयज्ञोयद्बलिंकरो
तिसभूतयज्ञोयत्पितृभ्योददातिसपितृयज्ञोयत्स्वाध्यायमधीतेसब्रह्म
यज्ञोयन्मनुष्येभ्योददातिसमनुष्ययज्ञइतितानेतान्यज्ञानहरहःकुर्वीत
॥१॥अथस्वाध्यायविधिःप्राच्यांदिश्युदीच्यांवाग्रामान्निष्क्रम्यापआप्लुत्यशु
चौदेशेयज्ञोपवीत्याचम्याक्लिन्नवासादर्भाणांमहदुपस्तीर्यप्राक्कूला
नांतेषुप्राङ्मुखउपविश्योपस्थंकृत्वादक्षिणोत्तरौपाणीसंधायपवि
त्रवंतौविज्ञायतेऽपांवाएषओषधीनांरसोयद्दर्भाःसरसमेवतद्ब्र

त्यकरोतिद्यावापृथिव्योःसंधिमीक्षमाणःसंमील्यवायथावायुक्तोमंनम
न्येततथायुक्तोधीयीतस्वाध्यायमोंपूर्वाव्याहृतयःसावित्रीमन्वाहप
पच्छोर्द्धर्चशःसर्वामंततीयं॥२॥अथस्वाध्यायमधीयीतऋचोयजूंषिसा
मान्यथर्वांगिरसोब्राह्मणानिकल्पा[illegible]गाथानारांसीरितिहासपुराणानी
तियदृचोधीतेपयआहुतिभिरेवतद्देवांस्तर्पयतियद्यजूंषिघृताहु
तिभिर्यत्सामानिमध्वाहुतिभिर्यदथर्वांगिरसःसोमाहुतिभिर्यदृचोधीते
पयसःकुल्याअस्यपितॄन्स्वधाउपक्षरंतियद्यजूंषिघृतस्यकुल्याय
त्सामानिमध्वःकुल्यायदथर्वांगिरसःसोमस्यकुल्यायद्ब्राह्मणानिक
ल्पान्गाथाँरितिहासपुराणानीत्यमृतस्यकुल्याःसयावन्मन्येततावद
धीत्येतयापरिदधातिनमोब्रह्मणेनमोअस्त्वग्नयेनमःपृथिव्येनमओ

यद्ब्राह्मणानिकल्पान्गाथानाथानाराशंसीरितिहास
पुराणानीति अमृताहुतिभिरेवतद्देवतास्तर्पयति
२०

त्या
ति २
[illegible]दि
२०
नाराशं
सी

र्यंशाकलंबाष्कलंसुजातवक्त्रमौदवाहिंमहोदवाहिंसौजामिंशौनकंमा
२१ श्वलायनंयेचान्येआचार्यास्तेसर्वेतृप्यंत्वितिप्रतिपुरुषंपितृंस्तर्पयित्वागृ
हानेत्ययद्ददातिसादक्षिणाथापिविज्ञायतेसयदितिष्ठन्व्रजन्नासीनःशया
नोवायंयंक्रतुमधीतेतेनतेनहास्यक्रतुनेष्टंभवतीतिविज्ञायतेतस्यहद्वावन्
ध्यायौयदात्माशुचिर्यद्देशः॥४॥अथातोध्यायोपाकरणमोषधीनांप्रादुर्भा
वेश्रवणेनश्रावणस्यपंचम्यांहस्तेनवाज्यभागौहुत्वाज्याहुतीर्जुहुयात्सा
वित्र्यैब्रह्मणेश्रद्धायैमेधायैप्रज्ञायैधारणायैसदसस्पतयेनुमतयेछंदो
भ्यऋषिभ्यश्चेत्यथदधिसक्तूञ्जुहोत्यग्निमीळेपुरोहित[illegible]मित्येकंकु
षुंभकस्तदब्रवीदावदंस्त्वंशकुनेभद्रमावदस्तृणानाजमदग्निनाधामंतेवि २१
श्वंभुवनमधिश्रितंगंतानोयज्ञंयज्ञियाःशंसुमिथोनःस्वोअरणःप्रति

(५)

षधीभ्यः ॥ नमो वाचे नमो वाचस्पतये नमो विष्णवे महते करोमीति ॥ ३ ॥ देवतास्तर्पयति प्रजापतिर्ब्रह्मा वेदा देवा ऋषयः सर्वाणि छंदांस्योंकारो वषट्कारो व्याहृतयः सावित्री यज्ञा द्यावापृथिवी अंतरिक्षं अहोरात्राणि संख्याः सिद्धाः समुद्रा नद्यो गिरयः क्षेत्रौषधिवनस्पतिगंधर्वाप्सरसो नागा वयांसि गावः साध्या विप्रा यक्षा रक्षांसि भूतान्येवमंतान्यथ ऋषयः शतर्चिनो माध्यमा गृत्समदो विश्वामित्रो वामदेवो त्रिर्भरद्वाजो वसिष्ठः प्रगाथाः पावमान्यः क्षुद्रसूक्ता महासूक्ता इति प्राचीनावीती सुमंतुजैमिनिवैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्या जानंति बाहवि गार्ग्य गौतम शाकल्य बाभ्रव्य मांडव्य मांडूकेया गार्गी वाचक्नवी वडवा प्रातिथेयी सुलभा मैत्रेयी कहोळं कौषीतकं महाकौषीतकं पैंग्यं महापैंग्यं सुयज्ञं सांख्यायनं ऐतरेयं महैतरेयं

चक्षुर्विचक्षुराग्नेया हि मरुत्सखायस्ते राजन्छृतं हविरिति द्वृचाः समानी व आकूतिरित्येकानुच्छंदो योरात्रणी महइत्येकाध्येष्यमाणो ध्याप्येरन्त्रासन्न एताभ्यो देवताभ्यो हुत्वा सोविष्टकृतं हुत्वा दधिसक्तून्प्राश्य ततो मार्जनमपरेणाग्निं प्राक्कूलेषु दर्भेषु पवित्रपाद पात्रे दर्भान्कृत्वा ब्रह्मांजलिकृतो जपेदोंपूर्वा व्याहृतयः सावित्रीं च त्रिरभ्यस्य वेदादिमारभेत्तैः तोत्सर्गे षण्मासा थो नधीयीत समावृत्तो ब्रह्मचारिकल्पेन यथान्यायमितरे जायोपेयुरित्येके प्राजापत्यं तद्धार्षिकमित्यिन दाचक्षते मध्यमाष्टकायां [illegible]भ्यो नो [illegible] देवताभ्योन्नेन हुत्वा योग्यवयंत्येता एव देवतास्तर्पयंत्याचार्यानृषीन्पितृश्चैवं तदुत्सर्जनं ॥ ५ ॥ अथ काम्यानां स्थाने काम्या अरवस्तानि व कामानाप्नोत्यथ व्याधितस्यातुरस्य यक्ष्मगृहीतस्य वाषलादुति श्व

ए०सू०२

२२ रूमुंचामित्याहतविषाजीवनायकमित्येनेनस्वप्नममनोज्ञं दृष्ट्वा धानो देव
सवितरिति द्वाभ्यां यच्च गोदुःष प्न्यमिति पंचभिरादित्यमुपतिष्ठेत यो मे
राजन्युज्यो वा सखा वेति वा क्षुत्वाऽऽजृंभित्वा मनोज्ञं दृष्ट्वा पापकं गंधमा
घ्रायाक्षिस्पंदने कर्णध्वनने च सुचक्षा अहमक्षीभ्यां भूयासं सुवर्चा मुखे
न सुश्रुत्कर्णाभ्यां मयि दक्षक्रतू इति जपेद्गमनीयां गत्वा याज्यं याजयि
त्वा भोज्यं भुक्त्वा प्रतिग्राह्यं प्रतिगृह्य चेत्ययूपं वोपहत्य पुनर्मामैत्विंद्रि
यं पुनरायुः पुनर्भगः ॥ पुनर्द्रविणमैतु मां पुनर्ब्राह्मणमैतु मां स्वाहा ॥
इमे ये धिष्ण्यासो अग्नयो यथास्थानमिह कल्पतां ॥ वैश्वानरो वावृधानो २२
ऽन्तर्यच्छतु मे मनो हृद्यंतरमम तस्य केतुः स्वाहेत्याज्याहुतिं जुहुया
त्समिधौ वा जपेद्वा ॥ ६ ॥ अथाधितं चेत्स्वपंतमादित्योऽभ्यस्तमियाद्वा

जनमुष्णीषमित्यात्मने वाचार्याय च यद्युभयोर्न विंदेताचार्यायैव समिधं
त्वा दूरे दृप राजितायां दिशि यज्ञि यस्य वृक्षस्यार्द्रामन्नाद्यकामः पुष्टि
कामस्तेजस्कामो वा ब्रह्मवर्चसकाम उपवातामुभयीमुभयकाम उपरि
२३ समिसंधं कृत्वा गामन्नं च ब्राह्मणेभ्यः प्रदाय गोदानिकं कर्म कुर्वीतात्म
निमंत्र्यान्तसमन्त्रमयेदकक्रीतकेन शीतोष्णाभिरद्भिः स्नात्वा युवं वस्त्रा
णि पीवसा वसाथ इत्यहतेन वाससाऽऽच्छाद्याथाञ्जनस्तेजोसि चक्षुर्मे पाहि
ति चक्षुषी अंजयीताथ मनस्तेजोसि श्रोत्रं मे पाहीति कुंडले आबध्नीता
नुलेपनेन पाणी प्रलिप्य मुखमग्रे ब्राह्मणोऽनुलिंपेद्बाहू राजन्य उ २३
दरं वैश्य उपस्थं स्त्र्यूरू सरणजीविनो नार्यास्य नाभोर्हिं भूयासमिति
स्रजमाबध्नीत नमालोकोमालेति चेद्युस्तगित्यभिधायोपीनद्धवानां

२३

ग्यतोनुपविशुंत्रात्रिऔषंभूत्वायिनसूर्यज्योतिषा बाधसेतमइति पंचभिरा
२८ दित्यमुपतिष्ठतोम्युदियाच्चेदं मेकदश्यांतमनभिरूपेणकर्मणावाग्यत
इतिसमानमुत्तराभिश्चतस्रभिरूपस्थानंयज्ञोपवीतीनित्योदकः संध्या
मुपासीतवाग्यतः सायमुत्तरापराजभिमुखोन्वष्टमदेशंसावित्रीऊप
दर्द्धास्तमितेमंडलआनक्षत्रदर्शनादेवंप्रातःप्राङ्मुखस्तिष्ठन्नामं
डलदर्शनात्कपोतश्चेदगारमुपहन्यादनुपतेद्वा देवाः कपोतइतिप्र
त्यृचंजुहुयाज्जपेद्वावचमुत्वा पथस्पतइत्यर्धर्चयोश्चारिष्यन्तसंपूष
न्विदुषेतिनष्टमधिजिगमीषन्नन्वद्योवासंपूषन्नध्वनइतिमहान्ते
मध्वानंमुष्यन्प्रातिभयंवा ॥ ७ ॥ अथैतान्युपकल्पयीतसमावर्तमानो
मणिंकुंडलेवस्त्रयुगंछत्रमुपानद्युगंदंडंस्रजमुन्मर्दनमनुलेपनमां

प्रतिष्ठस्थः सर्वतोमापातमिर्मित्युपानहावास्थायदिवच्छादयासीतिछत्रमाद
त्तेवेणुरसिवानस्पत्योसिसर्वतोमापाहीतिवेणवंदंडमायुष्यमिति
सूक्तेनमणिकंठेप्रतिमुंच्योष्णीषंकृत्वातिष्ठन्समिधमादध्यात् ॥ ८ ॥
स्मृतंनिंदाचविद्याचश्रद्धाप्रज्ञाचपंचमी ॥ इष्टंदत्तमधीतंचकृतंसत्यं
श्रुतंव्रतं ॥ यदस्येसंद्रस्यसप्रजापतिकस्यसऋषिकस्यसऋषिराज
न्यस्यसपितृकस्यसपितृराजन्यस्यसमनुष्यस्यसमनुष्यराजन्यस्य
साकाशस्यसातीकाशस्यसानूकाशस्यसप्रतीकाशस्यसदेवमनु
ष्यस्यसगंधर्वाप्सरस्कस्यसहारण्यैश्चपशुभिर्ग्राम्यैश्चयन्मआत्म
निवृतंतन्मेसर्वंव्रतमिदमहंमग्नेसर्वतोभवामिस्वाहेतिमाम्नेवर्चस्य
२९ इतिप्रत्यृचंसमिधोभ्यादध्याच्चत्रेनंप्रऊसिष्यंतोभवंतित्रेतांरात्रीवसे लि

२४

द्धिर्धांते गुरुमर्थेन निमंत्र्य कृतानुज्ञातस्य वा स्नानं तस्येतानि व्रतानि भ
वंति न नक्तं स्नायात् न नग्नः स्नायात् न नग्नः शयीत न नग्नां स्त्रियमीक्षे
तान्यत्र मैथुनान्नादूर्षति न धावेन्न वृक्षमारोहेन्न कूपमवरोहेन्न बाहुभ्यां
नदीं तरेन्न संशयमभ्यापद्येत महद्वै भूतं स्नातको भ व
तीति विज्ञायते ॥९॥ गुरवे प्रसक्ष्यमाणो नाम प्रब्रुवीत देवदत्तास्मि भो
भो इत्युच्चैरूर्ध्वं नाम्नः प्राणापानयोरुपांश्वाम द्रेर्दृंहरिभिरिति
न्वाति वृद्धा जपति प्राणापानयोरुरुष्य चास्तया प्रपद्ये देवाय सवि
त्रे परिददामीत्यर्चं च समाप्यां प्रावस्वस्तीति जपित्वा महित्री णामि
तुनुमन्त्र्येवमतिसृष्टस्य न कुतश्चिद्भयं भवतीति विज्ञायते वयसाम
मनोज्ञा वाचः श्रुत्वाकनिक्रदज्जनुषं प्रब्रुवाण इति सूक्तं जपेद्

२४

वीवाच्चमजनयंत देवा इति च सूक्त द्विः कृतं गर्गसदं युवानमिति मृगस्य
यस्या दिशो बिभीयाथ तस्माद्धार्तां दिशमुल्मुकमुभयतः प्रदीप्तं प्रत्यस्ये
न्मंथं वा प्रसव्यमालोड्याभयं मित्रावरुणा मह्यमस्त्वर्चिषा शत्रूं दहंतं
प्रतीत्य मा प्रज्ञातारं मा प्रतिष्ठां विंदंतु मिथो भिंदाना मुभयंतु मृत्यु
मितिसंसृष्टं धनमभयं समाकृतमिति मंथं न्यंचं करोति ॥१०॥ सर्वतो
भयादनाज्ञातादष्टावाज्याहुतीर्जुहुयात् पृथिवी वृता साग्निना वृता
तया वृतयावर्त्यायि यस्माद्भयाद्बिभेमि तद्वारये स्वाहा ॥ अंतरिक्षं वृतं तद्वा
युना वृतं ते दिशो वृतास्ताश्चंद्रमसा वृतास्ताभिर्वृताभिवत्रऽभिर्यस्माद्भ
याद्बिभेमि ॰ नवृतेन वेत्रेण यस्याद्भयाद्बिभेमि तद्वापैरे स्वाहा ॥ द्यौर्वृता

२९

सादित्येन वृता तया वृतया वत्र्र्यायस्माद्भयाद्बिभेमि तद्वारये स्वाहा ॥ दिशो वृतास्ताश्चंद्रमसा वृतास्ताभिर्वृताभिर्वृत्रीभिर्यस्माद्भयाद्बिभेमि तद्वारये स्वाहा ॥ आपो वृतास्ता वरुणेन वृतास्ताभिर्वृताभिर्वृत्राभिर्यस्माद्भयाद्बिभेमि तद्वारये स्वाहा ॥ प्रजा वृतास्ताः प्राणेन वृतास्ताभिर्वृताभिर्वृत्राभिर्यस्माद्भयाद्बिभेमीन तद्वारये स्वाहा ॥ सर्वं वृतं तद्ब्रह्मणा वृतं तेन वृतेन वृत्रेण यस्माद्भयाद्बिभेमि तद्वारये स्वाहेत्यथापराजितायां दिश्यवस्थाय स्वस्त्यात्रेयं जपति यत इंद्र भयामहे इति च सूक्तशेषम् ॥११॥ संग्रामे समुपोढे राजानं संनाहयेदा त्वाहार्षमंतरभूरिति पश्चाद्रथस्यावस्थाया जीमूतस्येव भवति प्रतीकमिति कवचं प्रयच्छेदुत्तरया धनुरुत्तरां वाचयेत्स्वयं चतुर्थीं जपेत्पंचम्येषुधिं प्रयच्छेदभिप्रवर्तमाने षष्ठीं

सम्पाश्वानष्टमीमिषूनवेक्षमाणं वाचयत्यहिरिव भोगैः पर्येति बाहुमिति तलं नह्यमानमथैनं सारयमाणमुपारुह्याभीवर्त्तं वाचयति प्रयोगो मित्रावरुणेति च द्वे अथैनमन्वीक्षेताप्रतिरथं शास सौपर्णैः प्रधारयन्तु मधुनो घृतस्येत्यनत्सोपर्णं सर्वा दिशोऽनुपरियायादादित्ये मोघानं संवाचस्थाय प्रयोदुपश्वासय पृथिवीमुत द्यामिति तिसृभिश्चैनं दुंदुभिमभिमंत्र्यादवसृष्टा परापततीषून्विसृज्येयत्र बाणाः संपतंतीति युध्यमानेषु जपेत्संशिष्याद्वा तं संशिष्याद्वा ॥१२॥ इत्याश्वलायनगृह्यसूत्रे तृतीयोऽध्यायः ॥३॥

K K S U LIBRARY
RAMTEK
441 106
M-1153
Dist Nagpur

```
[OrderDescription]
,CREATED=22.10.20 12:13
,TRANSFERRED=2020/10/22 at 12:16:28
,PAGES=26
,TYPE=STD
,NAME=S0004370
,Book Name=M-1153-AASVALAYAN GRIHSUTRA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
```

```
FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,
```